॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## आदित्य हृदय स्तोत्र




श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

## आदित्य हृदय स्तोत्र

विनियोग

ॐ अस्य आदित्यहृदयस्तोत्रस्य अगस्त्यऋषिः
अनुष्टुप्छन्दः, आदित्यहृदयभूतो
भगवान् ब्रह्मा देवता निरस्ताशेषविघ्नतया
ब्रह्मविद्यासिद्धौ सर्वत्र जयसिद्धौ च विनियोगः।

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि धियो यो नः प्रचोदयात् ॥

## पूर्व पीठिका

ततो युद्धपरिश्रान्तं, समरे चिन्तया स्थितम् ।
रावणं(ञ्) चाग्रतो दृष्ट्वा, युद्धाय समुपस्थितम् ॥1॥

दैवतैश्च समागम्य, द्रष्टुमभ्यागतो रणम् ।
उपगम्याब्रवीद् राम- मगस्त्यो भगवांस्तदा ॥2॥

राम राम महाबाहो, श्रृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स, समरे विजयिष्यसे ॥3॥

आदित्यहृदयं पुण्यं, सर्वशत्रुविनाशनम् ।
जयावहं(ञ्) जपं(न्) नित्य- मक्षयं परमं शिवम् ॥4॥

सर्वमंगलमांगल्यं, सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमन- मायुर्वर्धनमुत्तमम् ॥5॥

## मूल -स्तोत्र

रश्मिमन्तं समुद्यन्तं(न्), देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं, भास्करं भुवनेश्वरम् ॥6॥

सर्वदेवात्मको ह्येष, तेजस्वी रश्मिभावनः ।
एष देवासुरगणाँल्- लोकान् पाति गभस्तिभिः ॥7॥

एष ब्रह्मा च विष्णुश्च, शिवः(स्) स्कन्दः(फ्) प्रजापतिः ।
महेन्द्रो धनदः(ख्) कालो, यमः(स्) सोमो ह्यपां पतिः ॥8॥

पितरो वसवः(स्) साध्या, अश्विनौ मरुतो मनुः ।
वायुर्वह्निः(फ्) प्रजाः(फ्) प्राण, ऋतुकर्ता प्रभाकरः ॥9॥

आदित्यः(स्) सविता सूर्यः(ख्), खगः(फ्) पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुर्- हिरण्यरेता दिवाकरः ॥10॥

हरिदश्वः(स्) सहस्रार्चिः(स्), सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनः(श्) शम्भुस्- त्वष्टा मार्तण्डकों(व्)ऽशुमान् ॥11॥

हिरण्यगर्भः(श्) शिशिरस्- तपनोऽहस्करो रविः ।
अग्निगर्भोऽदितेः(फ्) पुत्रः(श्), शंखः(श्) शिशिरनाशनः ॥12॥

व्योमनाथस्तमोभेदी, ऋग्यजुः(स्)सामपारगः ।
घनवृष्टिरपां मित्रो, विन्ध्यवीथीप्लवंगमः ॥13॥

आतपी मण्डली मृत्युः(फ्), पिङ्गलः(स्) सर्वतापनः।
कविर्विश्वो महातेजा, रक्तः(स्) सर्वभवोद्भवः ॥14॥

नक्षत्रग्रहताराणा- मधिपो विश्वभावनः ।
तेजसामपि तेजस्वी, द्वादशात्मन् नमोऽस्तु ते ॥15॥

नमः पूर्वाय गिरये, पश्चिमायाद्रये नमः ।
ज्योतिर्गणानां पतये, दिनाधिपतये नमः ॥16॥
जयाय जयभद्राय, हर्यश्वाय नमो नमः ।
नमो नमः(स्) सहस्रां(व्)शो, आदित्याय नमो नमः ॥17॥

नम उग्राय वीराय, सारंगाय नमो नमः ।
नमः(फ्) पद्मप्रबोधाय, प्रचण्डाय नमोऽस्तु ते ॥18॥

ब्रह्मेशानाच्युतेशाय, सुरायादित्यवर्चसे ।
भास्वते सर्वभक्षाय, रौद्राय वपुषे नमः ॥19॥

तमोघ्नाय हिमघ्नाय, शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय, ज्योतिषां पतये नमः ॥20॥

तप्तचामीकराभाय, हरये विश्वकर्मणे ।
नमस्तमोऽभिनिघ्नाय, रुचये लोकसाक्षिणे ॥21॥

नाशयत्येष वै भूतं(न्), तमेव सृजति प्रभुः ।
पायत्येष तपत्येष, वर्षत्येष गभस्तिभिः ॥22॥

एष सुप्तेषु जागर्ति, भूतेषु परिनिष्ठितः ।
एष चैवाग्निहोत्रं(ञ्) च, फलं(ञ्) चैवाग्निहोत्रिणाम् ॥23॥

देवाश्च क्रतवश्चैव, क्रतुनां फलमेव च ।
यानि कृत्यानि लोकेषु, सर्वेषु परमप्रभुः ॥24॥

एनमापत्सु कृच्छ्रेषु, कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषः(ख्) कश्चिन्- नावसीदति राघव ॥25॥

पूजयस्वैनमेकाग्रो, देवदेवं(ञ्) जगत्पतिम् ।
एतत् त्रिगुणितं(ञ्) जप्त्वा, युद्धेषु विजयिष्यति ॥26॥

अस्मिन् क्षणे महाबाहो, रावणं(न्) त्वं(ञ्) जहिष्यसि ।
एवमुक्त्वा ततोऽगस्त्यो, जगाम स यथागतम् ॥27॥

एतच्छ्रुत्वा महातेजा, नष्टशोकोऽभवत् तदा ॥
धारयामास सुप्रीतो, राघवः(फ्) प्रयतात्मवान् ॥28॥

आदित्यं प्रेक्ष्य जप्त्वेदं, परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा, धनुरादाय वीर्यवान् ॥29॥

रावणं प्रेक्ष्य हृष्टात्मा, जयार्थं समुपागमत् ।
सर्वयत्नेन महता, वृतस्तस्य वधेऽभवत् ॥30॥

अथ रविरवदन्निरीक्ष्य रामं, मुदितमनाः(फ्) परमं प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा, सुरगणमध्यगतो वचस्त्वरेति ॥31॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
युद्धकाण्डे पञ्चाधिकशततमः(स्) सर्गः ॥